## ॥ अथ श्रीमद् गणेश- सहस्त्रनाम स्तोत्रम् ॥

॥ प्रारभ्यते ॥

श्री गणेशाय नम: ॥ श्री मत्सकलगाणेशाचार्य गुरुभ्यो नम: ॥

श्रीमद् अंकुशधारि सद्गुरये योगीन्द्राय नम: ॥

श्री मद् श्री हेरम्बराज सग्दुरये योगीन्द्राय नम: ॥

व्यासउवाच ॥ कथं नाम्नां सहस्त्रं तद् गणेश उपदिष्टवान् ॥
शिवदं तन्ममाचक्ष्व लोकानुग्रह तत्पर ॥ १ ॥

ब्रह्मोवाच ॥ देव: पूर्वं पुराराति: पुरत्रय जयोद्यमे ॥
अनर्चनाद् गणेशस्य जातो विघ्नाकुल: किल ॥ २ ॥
मनसा स विनिर्धार्य ततस्तद् विघ्नकारणं ॥
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥ ३ ॥
विघ्न प्रशमनो पायमपृच्छत्तं पराजित: ॥
संतुष्ट: पूजया शंभो र्महागणपति: स्वयम् ॥ ४ ॥
सर्वविघ्न प्रशमनं सर्वकाम फलप्रदं ॥
ततस्तस्मै स्वस्य नाम्नां सहस्त्रमिदमब्रवीत् ॥ ५ ॥

अस्य श्रीमद् गणेश दिव्य सहस्त्रनामामृत ॥
स्तोत्रमाला महामंत्रस्य श्रीमहागणपतिर्ऋषि: ॥
श्री स्वानन्देशो ब्रह्मणस्पति र्दैवता ॥
नानाविधानिच्छंदांसि ॥ हुमितिबीजं ॥
तुंगमिति शक्ति: ॥ स्वाहाशक्ति रितिकीलकं ॥
सकलविघ्न विनाशन द्वारा श्री ब्रह्मणस्पति
प्रीत्यर्थं जपे (पाठे) विनियोग: ॥ अथन्यासा: ॥
गणेश्वरो गणक्रीड इत्यंगुष्ठाभ्यांनम: ॥
कुमार गुरुरीशानेति तर्जनीभ्यां नम: ॥

ब्रह्माण्ड कुंभश्चिद् व्योमेति मध्यमाभ्यां नमः ॥

रक्तो रक्ताम्बरधर इत्यनामिकाभ्यां नमः ॥

सर्व सग्दरू संसेव्य इति कनिष्ठिकाभ्यां नमः ॥

लुप्तविघ्नः सुभक्तानां इति करतल कर पृष्ठाभ्यांनमः ॥

अथ हृदयादि न्यासाः ॥

छंदश्छंदोभ्दव इति हृदयाय नमः ॥

निष्कलो निर्मल इति शिरसे स्वाहा ॥

सृष्टिस्थिति लयक्रीड इति शिखायै वषट् ॥

ज्ञानं विज्ञान मानंदं इति कवचाय हुम् ॥

अष्टांग योग फलभृदिति नेत्रत्रयाय वौषट् ॥

अनंतशक्ति सहित इत्यस्त्राय फट् ॥

इति दिग्बंधः ॥ अथ ध्यानम् ॥

रक्तां भोधिस्थपोतोल्लसदरुण सरोजाधिरुढं त्रिनेत्रं ॥
पाशं चैवां कुशाढ्यं परशु मभयदं बाहुभिर्धारयन्तं ॥
शक्त्या युक्तं गजास्यं पृथुतर जठरं सिद्धिबुद्धि समेतं ॥
रक्तं चंद्रार्ध मौलिं सकल भयहरं विघ्नराजं नमामि ॥ १ ॥

श्री सिद्धिबुध्दि सहिताय सलक्षलाभाय श्री स्यानन्देशाय ब्रह्मणस्पतये सांगाय सपरिवाराय सशक्तिकाय सायुधाय सवाहनाय सावरणाय नमः ॥ इति नाममंत्रेण मानसैः पंचोपचारैः संपूज्य पठेत् ॥

## श्री महागणपति रुवाच ॥

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ॥
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥ १ ॥
लंबोदरो धूम्रवर्णो विकटो विघ्ननायकः ॥
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः ॥ २ ॥
भीमः प्रमोद आमोदः सुरानन्दो महोत्कटः ॥
हेरम्बः शंबरः शंभुर्लम्बकर्णो महाबलः ॥ ३ ॥
नंदनो लंपटो भीम मेघनादो गणंजयः ॥
विनायको विरूपाक्षो वीरशूरवरप्रदः ॥ ४ ॥
महागणपति र्बुद्धि प्रियः क्षिप्रप्रसादनः ॥
रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽ घनाशनः ॥ ५ ॥
कुमार गुरुरीशानपुत्रो मूषकवाहनः ॥
सिद्धिप्रियः सिद्धिपतिः सिद्धिः सिद्धिविनायकः ॥ ६ ॥
अविघ्नस्तुम्बरु सिंहवाहनो मोहिनी प्रियः ॥
कंटकटो राजपुत्रः शाकलः संमितोऽमितः ॥ ७ ॥
कुष्माण्ड सामसंभूति र्दुर्जयो धुर्जयो जयः ॥
भूपति र्भुवनपति र्भूतानां पति रव्ययः ॥ ८ ॥
विश्वकर्ता विश्वमुखो विश्ववंद्यो विनिर्गुणः ॥
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥ ९ ॥
जेष्ठराजो निधिपति र्निधिप्रिय पति प्रियः ॥
हिरण्यम पुरांतः स्थः सूर्यमण्डल मध्यगः ॥ १० ॥
कराहति ध्वस्त सिंधु सलिलः पूषदंतभित् ॥
उमांककेलि कुतुकी मुक्तिदः कुलपालनः ॥ ११ ॥

किरीटि कुंडलि हारि वनमालि मनोमयः ॥
वैमुख्य हत दैत्य श्रीः पादाहत्ये जितक्षितिः ॥१२॥
सद्योजातः स्वर्णमुंज मेखली दुर्निमित्तहृत् ॥
दुःस्वप्न दुष्ट शमनो गुणी नाद प्रतिष्ठितः ॥१३॥
सुरुपः सर्वनेत्राधिवासो विभ्राजिनूपुरः ॥
पीतांबरः खण्डरदः खण्डवैशाख संस्थितः ॥१४॥
चित्रांगः श्यामदशनो भालचन्द्रो हविर्भुजः ॥
योगाधिप स्तारकस्थ पुरुषो गजकर्णकः ॥१५॥
गणाधिराजो विजयः स्थिरो गजपतिर्ध्वजी ॥
देवदेवः स्मरप्राण दीपको वायुकीलकः ॥१६॥
विपश्चिद् वरदो श्नादो नादभिन्न महाचल : ॥
वराह वदनो मृत्युंजयो व्याघ्रजिनांबरः ॥१७॥
इच्छाशक्ति भवो देवत्राता दैत्यविमर्दनः ॥
शंभुवक्त्रोभ्दवः शंभु कोपजः शंभुहास्यभूः ॥१८॥
शंभुतेजाः शिवाशोक हारी गौरी सुखावहः ॥
उमांगमलजो गौरी तेजो भूः स्वर्धुनी भवः ॥१९॥
मत्तकायो महानादो गिरिवर्ष्मा शुभाननः ॥
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्ध्दा ककुप्श्रुतिः ॥२०॥
ब्रह्माण्ड कुम्भश्चिद् व्योमभालः सत्य शिरोरुहः ॥
जगज्जन् मलयोन्मेष निमेषोऽग्न्यर्क सोमदृक् ॥२१॥
गिरीन्द्रैकरदो धर्मा धर्मोष्ठः सामबृंहितः ॥
ग्रहर्क्ष दशनो वाणी जिह्वो वासव नासिकः ॥२२॥
भ्रूमध्य संस्थित करो ब्रह्मविद्या मदोदकः ॥
कुलाचलांसः सोमार्क घंटो रुद्र शिरोधरः ॥२३॥

नदीनद भुजः सर्पांगुलीक स्तारका नखः ॥
व्योमनाभिः श्रीर्हृदयो मेरू पृष्ठोऽर्णवोदरः ॥२४॥
कुक्षिस्थ यक्षगन्धर्व रक्षः किन्नर मानुषः ॥
पृथ्वीकटिः सृष्टि लिंगः शैलोरुर्दस्त्रजानुकः ॥२५॥
पातालजंघो मुनिपात्कालांगुष्ठ स्त्रयीतनुः ॥
ज्योतिर्मण्डल लांगूलो हृदयालाननिश्चलः ॥२६॥
हृत्पद्म कर्णिका शाली वियत्केलि सरोवरः ॥
सम्दक्त ध्यान निगडः पूजावारी निवारितः ॥२७॥
प्रतापी काश्यपो यंता गणको विष्टपीबली ॥
यशस्वी धार्मिको जेताः प्रथमः प्रथमेश्वरः ॥२८॥
चिंतामणि द्वीपपतिः कल्पद्रुम वनालयः ॥
रत्नमण्डप मध्यस्थो रत्नसिंहासनाश्रयः ॥२९॥
तीव्रा शिरोध्दृत पदो ज्वालिनी मौलिलालितः ॥
नंदानंदित पीठश्री र्भोगदा भूषितासनः ॥३०॥
सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ॥
तेजोवती शिरोरत्नं सत्यानित्यावतंसितः ॥३१॥
सविघ्ननाशिनी पीठः सर्वशक्त्यं बुजालयः ॥
लिपिपद्मासनाधारो वह्निधामत्रयालयः ॥३२॥
उन्नतप्रपदो गूढगुल्फः संवृत पार्ष्णिकः ॥
पीनजंघः श्लिष्ट जानुः स्थूलोरुः प्रोन्नमत्कटिः ॥३३॥
निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ॥
पीनस्कन्धः कंबुकंठो लंबोष्ठो लंबनासिकः ॥३४॥
भग्नवामरद स्तुंगा सव्यदंतो महाहनुः ॥
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिड मस्तकः ॥३५॥

स्तबकाकार कुंभाग्रो रत्नमौलि र्निरंकुश: ॥
सर्पहार कटीसूत्र: सर्पयज्ञोपवीतवान् ॥३६॥
सर्पकोटीरकटक: सर्पग्रैवेयकांगद: ॥
सर्पकक्षोदराबंध: सर्पराजोत्तर च्छद: ॥३७
रक्तो रक्ताम्बरधरो रक्तमाल्य विभूषण: ॥
रक्तेक्षणो रक्तकरो रक्तताल्योष्ठ पल्लव: ॥३८॥
श्वेत: श्वेताम्बरधर: श्वेतमाल्य विभूषण: ॥
श्वेतात पत्ररूचिर: श्वेतचामर वीजित: ॥३९॥
सर्वावयव संपूर्ण: सर्व लक्षण लक्षित: ॥
सर्वाभरण शोभाढ्य: सर्व शोभा समन्वित: ॥४०॥
सर्व मंगल मांगल्य: सर्व कारण कारणं ॥
सर्व दैक कर: शांर्गी बीजपूरी गदाधर: ॥४१॥
शुभ्रांगो लोकसारंग: सुतंतु स्तंतुवर्ध्दन: ॥
किरीटी कुण्डली हारी वनमाली शुभांगद: ॥४२॥
इक्षुचापधर: शूली चक्रपाणि: सरोजभृत् ॥
पाशी धृतोत्पल: शाली मंजरी भृत्स्वदंतभृत् ॥४३॥
कल्पवल्ली धरो विश्वाभयदैक करो वशी ॥
अक्षमाला धरो ज्ञानमुद्रावान् मुग्दरायुध: ॥४४॥
पूर्णपात्री कंबुधरो विधृताक्ष: सुमोदक: ॥
करस्थाम्रफलश्चूत कलिका भृत्कुठारवान् ॥४५॥
पुष्करस्थ स्वर्णघट पूर्ण रत्नांबुवर्षक: ॥
भारती सुंदरी नाथो विनायक रतिप्रिय: ॥४६॥
महालक्ष्मी प्रियतम: सिद्धलक्ष्मी मनोरम: ॥
रमारमेश पूर्वांगो दक्षिणोमा महेश्वर: ॥४७॥

महीवराह वामांगो रतिकंदर्प पश्चिमः॥
आमोद मोद जननः सप्रमोद प्रमोदनः ॥४८॥
समेधित समृद्ध श्री ऋद्धि सिद्धि प्रवर्धनः॥
दंतसौमुख्य-सुमुख कांति कंदलिताश्रयः ॥४९॥
मदनावत्या श्रितांघ्र कृत सौमुख्य दुर्मुखः॥
विघ्न संपल्लवोद्विघ्न सेवो श्निद्र मदद्रवः ॥५०॥
विघ्नकृ श्निम्नचरण द्राविणी शक्ति संवृतः॥
तीव्रा प्रसन्न वदनो ज्वालिनी पालितैकदृक्॥ ॥५१॥
मोहिनी मोहनो भोग दायिनी कांति मंडितः॥
कामिनी कांतयुक्त श्री स्तेजिन्याधिष्ठितैकदृक् ॥५२॥
वसुधारा मदोन्नादो महाशंख निधिप्रियः॥
नमद्वसुमती मौलिप्रव्हः पद्मनिधि प्रभुः ॥५३॥
सर्व सग्दुरु संसेव्यः शोचिष्केश हृदाश्रयः॥
ईशान मूर्ध्दा देवेन्द्र शिखः पवन नंदनः ॥५४॥
प्रत्युग्र नयनादित्यो दिव्यास्त्राणां प्रयोगवित्॥
ऐरावतादि सर्वाशा वारणो वारणप्रियः ॥५५॥
वजाद्यस्त्र परीवार गणचण्ड समाश्रयः॥
जयाजय परिकरो विजया विजया वहः ॥५६॥
अजयार्चित पादाब्जो नित्यानित्यवलंबितः॥
विलासिनी कृतोल्लास-शौंडी सौंदर्यमंडितः ॥५७॥
अनंतानंत सुखदः सुमंगल सुमंगलः॥
ज्ञानाश्रयः क्रियाधार इच्छाशक्तिनिषेवितः ॥५८॥
सुभगा संश्रित पदो ललिता ललिताश्रयः॥
कामिनी पालनः काम कामिनी केलिलालितः ॥५९॥

सरस्यत्याश्रयो गौरीनंदन: श्रीनिकेतन: ॥
गुरुगुप्तप्रदो याचासिद्धो यागीश्वरीपति: ॥६०॥
नलिनीकामुको रामा यामा जेष्ठा मनोरम: ॥
रौद्री मुद्रित पादाब्जो हुंबीज स्तुंग शाक्तिक: ॥६१॥
विश्वादि जननत्राण स्याहाशक्ति सुकीलक: ॥
अमृताब्धि कृतावासो मदा घूर्णित लोचन: ॥६२॥
उच्छिष्टोच्छिष्ट गणप गणेशो गणनायक: ॥
सार्यकालिक संसिद्धि र्नित्यसेव्यो दिगम्बर: ॥६३॥
अनापायोऽ नंतशक्तिरप्रमेयोऽजरोऽमर: ॥
अनायिलोऽ प्रतिहति रच्युतोऽमृत मक्षरं ॥६४॥
अप्रतर्क्योऽ क्षयोऽजय्योऽनाधारोऽनामयोऽमल: ॥
अमेय सिध्दिरद्वैत मघोरोऽप्रमितानन: ॥६५॥
अनाकारोऽब्धि भूम्यग्नि बलघ्नोऽव्यक्त लक्षण: ॥
आधार पीठ आधार आधाराधेय यर्जित: ॥६६॥
आखुकेतन आशापूरक आखु महारथ: ॥
इक्षुसागर मध्यस्थ इक्षुभक्षण लालस: ॥६७॥
इक्षुचापाति रेकश्री रिक्षु चाप निषेवित: ॥
इंद्रगोप समानश्री रिन्द्र नील समद्युति: ॥६८॥
इंदीयरदलश्याम इंदु मण्डल मण्डित: ॥
इध्म प्रिय इडाभाग इडाधर्मेन्दिराप्रद: ॥६९॥
इक्ष्याकु यिघ्नविध्यंसी इतिकर्तव्यतेप्सित: ॥
ईशान मौलि रीशान ईशान प्रिय ईतिहा ॥७०॥
ईषाण त्रय कल्पान्त इहामुत्र वियर्जित: ॥
उपेन्द्र उडुभृन्मौलि रुंदूर कपति प्रिय: ॥७१॥

उन्नतानन उत्तुंग उदार त्रिदशाग्रणी:॥
ऊर्जस्वानूष्मलमद ऊहापोह दुरासद: ॥७२॥
ऋग्यजु: सामनयन ऋध्दिसिध्दि समर्पक:॥
ऋजुचित्तैक सुलभ ऋणत्रय विमोचन: ॥७३॥
लुप्तविघ्न: सुभक्तानां लुप्तशक्ति: सुरद्विषाम्॥
लुप्तश्री र्विमुखार्चानां लूताविस्फोट नाशन: ॥७४॥
एकारपीठ मध्यस्थ एकपाद कृतासन:॥
एजिता खिल दैत्य श्री रेधिताखिल संश्रय: ॥७५॥
ऐश्वर्य निधि रैश्वर्य मैहिका मुष्मिक प्रद:॥
ऐरावत समोन्मेष ऐरावत निभानन: ॥७६॥
ओंकारवाच्य ओंकार ओजस्वानोषधीपति:॥
औदार्य निधिरौध्दत्य धुर्य औन्नत्यनि:स्वन: ॥७७॥
अंकुश: सुरनागाना मंकुशा कार संस्थित:॥
अ: समस्त विसर्गाणां पदेषु परिकीर्तित: ॥७८॥
कमण्डलुधर: कल्प: कपर्दी कलभानन:
कर्मसाक्षी कर्मकर्ता कर्माकर्म फलप्रद: ॥७९॥
कदंब गोलकाकार कूष्माण्ड गणनायक:॥
कारुण्यदेह: कपिल: कथक: कटिसूत्र भृत ॥८०॥
खर्व: खर्वप्रिय: खड्गी खांतरस्थ: खनिर्मल:॥
खल्वाट शृंगनिलय: खट्वांगी खदुरासद: ॥८१॥
गुणाढयो गहनो गस्थो गद्यपद्य सुधार्णव:॥
गद्यगानप्रियो गर्जगीतो गीर्वाण पूर्वज: ॥८२॥
गुह्याचाररतो गुह्यो गुह्यागम निरुपित:॥
गुह्याशयो गुडाब्धिस्थो गुरुगम्यो गुरोर्गुरु: ॥८३॥

घंटाघर्घरिकामाली घटकुंभो घटोदर:॥
डंकारवाच्यो डांकारो डंकारा कार शुंडभृत् ॥८४॥
चण्डश्चण्डेश्वर श्चण्ड चण्डेश श्चण्ड विक्रम:॥
चराचर पिता चिंतामणी श्चर्वण लालस: ॥८५॥
छंदश्चच्छंदोभ्दवश्च्छंदो दुर्लक्ष्य श्च्छंद विग्रह:
जगद्योनि र्जगत्साक्षी जगदीशो जगन्मय: ॥८६॥
जपो जपपरो जाप्यो जिह्वा सिंहासन प्रभु:॥
झलझ्झलोल्ल सद्दानो झंकारि भ्रमराकुल: ॥८७॥
टंकार स्फार संराव ष्टंकार मणि नूपुर:॥
ठव्दय पल्लवांत:स्थ सर्व मंत्रेषु सिध्दिद: ॥८८॥
डिंडिमुण्डो डाकिनीशो डामरो डिंडिमप्रिय:॥
ढक्का निनाद मुदितो ढौंको ढौंढ विनायक: ॥८९॥
तत्वांना प्रकृतिस्तत्वं तत्वंपद निरुपित:॥
तारकांतर संस्थान स्तारक स्तारकान्तक: ॥९०॥
स्थाणु: स्थाणुप्रिय: स्थाता स्थावरं जंगमंजगत्
दक्षयज्ञ प्रमथनो दाता दानं दमो दया ॥९१॥
दयावान्दिव्य विभवो दण्डभृद् दण्डनायक:॥
दंतप्रभिन्न भ्रमरो दैत्य वारण दारण: ॥९२॥
दंष्ट्रा लग्न द्विपघटो देवार्थात्त गजाकृति:॥
धनं धनपते र्बन्धुर्धनदो धरणीधर: ॥९३॥
ध्यानैक प्रकटो ध्येयो ध्यानं ध्यान परायण:॥
ध्वनि प्रकृति चीत्कार ब्रह्माण्डा वलिमेखल: ॥९४॥
नंद्यो नादप्रियो नादो नादमध्ये प्रतिष्ठित:॥
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामय: ॥९५॥

परंव्योम परंधाम परमात्मा परंपदं॥
परात्परः पशुपतिः पशुपाश विमोचनः ॥९६॥
पूर्णानन्दः परानंदः पुराण पुरुषोत्तमः॥
पद्मप्रसन्ननयनः प्रणता ज्ञाननाशनः ॥९७॥
प्रमाणप्रत्ययातीतः प्रणतार्ति विनाशनः॥
फणिहस्तः फणिपति फूत्कार फाणितप्रियः ॥९८॥
बाणार्चितांघ्रि युगलो बालकेली कुतूहली॥
ब्रह्मब्रह्मार्चित पदो ब्रह्मचारी बृहस्पतिः ॥९९॥
बृहत्तरो ब्रह्मपरो ब्रह्मण्य ब्रह्मवित्प्रियः॥
भ्रूक्षेप दत्त लक्ष्मीको भर्ग्रो भद्रो भयापहः ॥१००॥
भगवान् भक्ति सुलभो भूतिदो भूतिभूषणः॥
भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः ॥१०१॥
मंत्रो मंत्रपति मंत्री मदमत्तो मनोमयः॥
मेखलाहीश्वरो मंदगति मन्द निभेक्षणः ॥१०२॥
महाबलो महावीर्यो महाप्राणो महामनाः॥
यज्ञो यज्ञपति यज्ञगोप्ता यज्ञफलप्रदः ॥१०३॥
यशस्करो योगगम्यो याज्ञिको याचकप्रियः॥
रसो रसप्रियो रस्यो रंजको रावणार्चितः ॥१०४॥
राज्यरक्षाकरो रत्नगर्भो राज्य सुखप्रदः॥
लक्ष्यो लक्ष्यपतिर्लक्ष्य लयस्थो लड्डुकप्रियः ॥१०५॥
लानप्रियो लास्यपरो लाभकृल्लोक विश्रुतः॥
वरेण्यो वह्नि वदनो वंद्यो वेदान्त गोचरः ॥१०६॥
विकर्ता विश्वतश्चक्षु र्विधाता विश्वतो मुखः॥
वामदेवो वज्रिनेता वज्रिवज्र निवारणः ॥१०७॥

विवस्यद् बंधनो विश्वाधारो विश्वेश्वरो विभुः॥
शब्दब्रह्ममय प्राप्यः शंभुशक्ति गणेश्वरः ॥१०८॥
शास्ता शिखाग्र निलयः शरण्यः शंबरेश्वरः
षड्ऋतु कुसुमस्त्रग्वी षडाधारः षडक्षरः ॥१०९॥
संसारवैद्यः सर्वज्ञः सर्वभेषज भेषजं॥
सृष्टिस्थिति लयक्रीडः सुरकुंजर भेदकः ॥११०॥
सिंदूरित महाकुंभः सदसद् व्यक्तिदायकः॥
साक्षी समुद्रमथनः स्वयंवेद्यः स्वदक्षिणः ॥१११॥
स्वतंत्रः सत्यसंकल्पः सामगानरतः सुखी॥
हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक् ॥११२॥
हव्यं हुतप्रियो हृष्टो हृल्लेखा मंत्रमध्यगः॥
क्षेत्राधिपः क्षमाभर्त्ता क्षमापर परायणः ॥११३॥
क्षिप्रक्षेमकरः क्षेमनंदः क्षोणी सुरद्रुमः॥
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ॥११४॥
विद्याप्रदो विभवदो भुक्तिमुक्ति फलप्रदः॥
अभिरुपकरो वीर श्री प्रदो विजयप्रदः ॥११५॥
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः॥
मेधादः कीर्तिदः शोकहारी दौर्भाग्य नाशनः ॥११६॥
प्रतिवादी मुखस्तम्भो रुष्टचित्त प्रसादनः॥
पराभिचार शमनो दुःखहा बंधमोक्षदः ॥११७॥
लवस्त्रुटिः कलाकाष्ठा निमेष स्तत्परक्षणः॥
घटी मुहूर्त प्रहरो दिवानक्त महर्निशं ॥११८॥
पक्षो मासोऽयनं वर्ष युगः कल्पो महालयः॥
राशिस्तारा तिथिर्योगो वारः करण मंशकं ॥११९॥

लग्नं होरा कालचक्रं मेरूः सप्तर्षयो ध्रुवः॥
राहुर्मंदः कविर्जीवो बुधो भौमः शशी रविः ॥१२०॥
कालः सृष्टिः स्थिति र्विश्वं स्थावरं जंगमंजगत्॥
भूरापोऽग्निर्मरुद् व्योमाहंकृतिः प्रकृतिः पुमान् ॥१२१॥
ब्रह्मा विष्णुः शिवो रुद्र इन्द्रः शक्तिः सदाशिवः॥
त्रिदशाः पितरः सिध्दा यक्षा रक्षांसि किन्नराः ॥१२२॥
साध्या विद्याधरः भूताः मनुष्याः पशवः खगाः॥
समुद्राः सरितः शैला भूतं भव्यं भवोभ्दवं ॥१२३॥
सांख्यं पातंजलं योगः पुराणानि श्रुतिःस्मृतिः॥
वेदांगानि सदाचारो मीमांसा न्यायविस्तरः ॥१२४॥
आयुर्वेदो धनुर्वेदो गांधर्वं काव्यनाटकं॥
वैखानसं भागवतं मानुषं पांचरात्रिकं ॥१२५॥
शैवं पाशुपतं कालमुखं भैरवशासनम्॥
शाक्तं वैनायकं सौरं जैनमार्हत संहिता ॥१२६॥
सदसद् व्यक्तमव्यक्तं सचेतन मचेतनं॥
बंधो मोक्षः सुखं भोग योगः सत्यमणुर्महान् ॥१२७॥
स्वस्ति हुंफट् स्वधा स्वाहा श्रौषड्वौषड् वषण्नमः॥
ज्ञानं विज्ञान मानंदो बोधः संवित्समोऽसमः ॥१२८॥
एक एकाक्षराधार एकाक्षर परायणः॥
एकाग्रधीरेकवीर एकानेक स्वरुपधृक ॥१२९॥
द्विरुपो द्विभुजोद्व्यक्षो व्दिरदो व्दीपरक्षकः॥
व्दैमातुरो व्दिवदनो व्दन्व्दहीनो द्वयातिगः ॥१३०॥
त्रिधामा त्रिकर स्त्रेता त्रिवर्ग फलदायकः॥
त्रिगुणात्मा त्रिलोकादि स्त्रिशक्तीश स्त्रिलोचनः ॥१३१॥

चतुर्बाहु श्चतुर्दन्त श्चतुरात्मा चतुर्मुख: ॥
चतुर्मख मयोपाय श्चतुर्वर्णाश्रमाश्रय: ॥१३२॥
चतुर्विध वचोवृत्ति परिवृत्ति प्रवर्तक: ॥
चतुर्थीपूजन प्रीति श्चतुर्थी तिथिसंभव: ॥१३३॥
पंचाक्षरात्मा पंचात्मा पंचास्य पंचपंचकृत् ॥
पंचाधार: पंचवर्ण: पंचाक्षर परायण: ॥१३४॥
पंचताल: पंचकर: पंचप्रणव मातृक: ॥
पंचब्रह्ममयस्फूर्ति: पंचावरण वारित: ॥१३५॥
पंचभक्षप्रिय: पंचबाण: पंचशिवात्मक: ॥
षट्कोणपीठ: षट्चक्र धामा षड्ग्रंथिभेदक: ॥१३६॥
षडंग ध्वान्त विध्वंसी षडंगुल महाह्रद: ॥
षण्मुख: षण्मुखभ्राता षट्शक्ति परिवारित: ॥१३७॥
षड्वैरी वर्ग विध्वंसी षडूर्मिभयभंजन: ॥
षट्तर्क दूर: षट्कर्मा: षड्गुण: षड्रसाश्रय: ॥१३८॥
सप्तपाताल चरण: सप्तद्वीपोरु मण्डल: ॥
सप्तस्वर्लोक मुकुट: सप्तसप्ति वरप्रद: ॥१३९॥
सप्तांगराज्य सुखद: सप्तर्षिगण वंदित: ॥
सप्तच्छंदोनिधी: सप्त होता सप्तस्वराश्रय: ॥१४०॥
सप्ताब्धिकेलिका सार: सप्तमातृनिषेवित: ॥
सप्तच्छंदो मोदमद: सप्तच्छंदो मखप्रभु: ॥१४१॥
अष्टमूर्ति ध्येयमूर्ति रष्ट प्रकृति कारणं ॥
अष्टांगयोगफलभृदष्ट पत्रांबुजासन: ॥१४२॥
अष्टशक्ति समान श्रीरष्टैश्वर्य प्रदायक: ॥
अष्टपीठोपपीठश्री रष्टमातृसमावृत: ॥१४३॥
अष्टभैरव सेव्योऽष्ट वसुवंद्यो ऽष्ट मूर्तिभृत् ॥

अष्टचक्र स्फुरन्मूर्ति रष्टद्रव्य हविः प्रियः ॥१४४॥
नवनागा सनाध्यासी नवनिध्यनु शासिता॥
नवव्दार पुरावृत्तो नवव्दार निकेतनः ॥१४५॥
नवनारायण स्तुत्यो नवदुर्गा निषेवितः॥
नवनाथ महानाथो नवनाग विभूषणः ॥१४६॥
नवरत्न विचित्रांगो नवशक्ति शिरोधृतः॥
दशात्मको दशभुजो दशदिक्पतिर्वंदितः ॥१४७॥
दशाध्यायो दशप्राणो दशेन्द्रिय नियामकः॥
दशाक्षर महामंत्रो दशाशाव्यापि विग्रहः ॥१४८॥
एकादशादिभीरुद्रैः स्तुतश्चैका दशाक्षरः॥
द्वादशोद्दण्डदो र्दण्ड व्दादशास्त्र निकेतनः ॥१४९॥
त्रयोदश भिदाभिन्न विश्वेदेवाधि दैवतं॥
चतुर्दशेन्द्र वरद श्चतुर्दश मनुप्रभुः ॥१५०॥
चतुर्दशाधि विद्याढ्य चतुर्दश जगत्पतिः॥
सामपंचदशः पंचदशी शीतांशु निर्मलः ॥१५१॥
षोडशाधार निलयः षोडशस्वरमातृकः॥
षोडशांत पदावासः षोडशेंदू कलात्मकः ॥१५२॥
कलासप्तदशी सप्तदशः सप्तदशाक्षरः॥
अष्टादशव्दीपपति रष्टादश पुराणकृत् ॥१५३॥
अष्टादशौषधि सृष्टि रष्टादश विधिस्मृतः॥
अष्टादश लिपिकृति रष्टादश विजातिकृत् ॥१५४॥
एकविंश त्पुमानेक विंशत्यंगुलि पल्लवः॥
चतुर्विंशति तत्वात्मा पंचविंशाख्य पूरुषः ॥१५५॥
सप्तविंशति तारेशः सप्तविंशति योगकृत॥
व्दात्रिंशद् भैरवाधीश श्चतुस्त्रिंश न्महाह्रदः ॥१५६॥

षट्त्रिंश त्तत्व संभूति रष्टत्रिंशत्कलातनुः ॥
नमदेकोन पंचाशन्मरुव्द्‌र्ग निर्गलः ॥१५७॥
पंचाश दक्षरश्रेणी पंचाशद्रुद्रविग्रहः ॥
पंचाशद् विष्णु शक्तीशः पंचाशन्मातृकालयः ॥१५८॥
व्दिपंचाशद् वपुःश्रेणी त्रिषष्ट्यक्षर संश्रयः ॥
चतुः षष्ट्यर्ण निर्णेता चतुषष्टि कलानिधिः ॥१५९॥
चतुःषष्टि महासिध्द योगिनी वृन्द वन्दितः ॥
अष्टषष्टि महातीर्थ क्षेत्र भैरव भावनः ॥१६०॥
चतुर्नवति मंत्रात्मा षण्णवत्यधिक प्रभुः ॥
शतानंदः शतधृतिः शतपत्रायते क्षणः ॥१६१॥
शतानीकः शतमखः शतधार वरायुधः ।
सहस्त्रपत्रनिलयः सहस्त्र फणिभूषणः ॥१६२॥
सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ॥
सहस्त्रनाम संस्तुत्यः सहस्त्राक्ष बलापहः ॥१६३॥
दशसहस्त्र फणिभृ त्फणिराज कृतासनः ॥
अष्टाशीति सहस्त्रौघ महर्षि स्तोत्र पाठितः ॥१६४॥
लक्षाधार प्रिया धारो लक्षाधार मनोमयः
चतुर्लक्ष जपप्रीति श्चतुर्लक्ष प्रकाशकः ॥१६५॥
चतुरशीति लक्षाणां जीवानां देहसंस्थितिः ॥
कोटिसूर्य प्रतीकाशः कोटि चंद्रांशु निर्मलः ॥१६६॥
सप्तकोटि महामंत्र मंत्रितावयव द्युतिः ॥
शिवोभ्दयाद्यष्ट कोटि विनायक धुरंधरः ॥१६७॥
त्रयस्त्रिंश त्कोटिसुर श्रेणी प्रणत पादुकः ॥
अनंतदेवता सेव्यो ह्यनंत शुभ दायकः ॥१६८॥
अनंतनामानंतश्री रनंता नंत सौख्यदः ॥
अनंत शक्ति सहितो ह्यनंत मुनि संस्तुतः ॥

समस्त कलह ध्वंसो दग्धबीजं प्ररोहणं ॥१६८॥
दुःस्वप्न नाशनं क्रुद्ध स्वामी चित्तप्रसादनं ।

अनंत मुनि संस्तुत ॐ नम इति ॥१६९॥
इति वैनायकं नाम्नां सहस्त्र मिद मीरितं।
इदं ब्राह्मे मुहूर्ते वै यः पठेत् प्रत्यहं नरः ॥१७०॥
करस्थं तस्य सकल मैहिकामुष्मिकं सुखं॥
आयुरारोग्य मैश्वर्य धैर्यं शौर्यं बलं यशः ॥१७१॥
मेधा प्रज्ञा धृतिः कान्तिः सौभाग्य मतिरूपता॥
सत्यं दया क्षमा शांति र्दाक्षिण्यं धर्मशीलता ॥१७२॥
जगत्संवननं विश्व संवादो वेदपाटवं॥
सभा पांडित्य मौदार्यं गांभीर्यं ब्रह्मवर्चसं ॥१७३॥
ओजस्तेजः कुलं शीलं प्रतापो वीर्यमार्यता॥
ज्ञानं विज्ञान मास्तिक्यं स्थैर्यं विश्वासता तथा ॥१७४॥
धन्यधान्यादि वृद्धिश्च सकृदस्य जपाभ्दवेत्॥
वश्यं चतुर्विधं विश्व जपादस्य प्रजायते ॥१७५॥
राज्ञो राजकलत्रस्य राजपुत्रस्य मंत्रिणः॥
जपते यस्य वश्यार्थं स दास स्तस्य जायते ॥१७६॥
धर्मार्थ काम मोक्षाणां अनायासेन साधनं॥
शाकिनी डाकिनी रक्षोयक्षग्रभयापहं ॥१७७॥
साम्राज्यसुखदं सर्व सपत्न मद मर्दनं॥
षट्कर्माष्ट महासिध्दि त्रिकाल ज्ञानकारणं ॥१७८॥
परकृत्य प्रशमनं परचक्र विमर्दनं॥
संग्रामरंगे सर्वेषा मिदमेकं जयावहं ॥१७९॥
सर्ववंध्यत्व दोषघ्नं गर्भ रक्षैक कारणं॥
पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदं ॥१८०॥
देशे तत्र न दुर्भिक्ष मीतयो दुरितानिच॥
न तद्देहं जहाति श्री यंत्रायं जप्यते स्तवः ॥१८१॥

क्षय: कुष्ठ; प्रमेहार्शो भंगदर विषूचिके॥
गुल्मं प्लीहा न यल्मीक मतिसारं महोदरं ॥१८२॥
कासं श्यासं गुदावर्तं शूलं शोकं जलोदरं॥
शिरोरोगं यमिं हिक्कां गण्डमाला मरोचकं ॥१८३॥
वातपित्त कफ व्दन्व्द त्रिदोष जनित ज्यरं॥
आगंतु विषमं शीत मुष्णं चैका हिकादिकं ॥१८४॥
इत्याद्युक्त मनुक्तं वा रोगं दोषादि संभवं॥
सर्वं प्रशमयत्याशु स्त्रोत्रस्यास्य सकृज्जप: ॥१८५॥
प्राप्यते ऽस्य जपात्सिद्धि: स्त्रीशूद्रपतितैरपि॥
सहस्त्रनाम मंत्रोऽयं जप्तव्यस्तु शुभाप्तये ॥१८६॥
महागणपते: स्तोत्रं सकाम: प्रजपन्निदं॥
इच्छाया सकलान भोगानुप भुज्येह पार्थिवान् ॥१८७॥
मनोरथ फलैर्दिव्यै र्व्योम यानै र्मनोरमै:॥
चन्द्रेन्द्र भास्करोपेन्द्र ब्रह्मशर्वादि सद्मसु ॥१८८॥
कामरूप: कामगति: कामद: कामदेश्वर:॥
भुक्त्वा यथेप्सितान् भोगानभीष्टै: सह बंधुभि: ॥१८९॥
गणेशोनुचरो भूत्वा महागणपते: प्रिय:॥
नंदीश्वरादि सानंदै र्नन्दित: सकलैर्गणै:
शिवाभ्यां कृपया पुत्र निर्विशेषेण लालित:॥ ॥१९०॥
शिवभक्त: पूर्णकामो गणेश्वर वरात्पुन:
जातिस्मरो धर्मपर: सार्वभौमोऽ भिजायते॥ ॥१९१॥
निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेश तत्पर:
योगसिद्धिं परांप्राप्य ज्ञानवैराग्य संस्थिति॥ ॥१९२॥
निरंतरो दितानंदे परमानन्द संज्ञिते

॥१९३॥

विध्नोतीर्णे परे पूर्णे पुनरावृत्ति वर्जिते॥
लीनो वैनायके धाम्नि रमते नित्यनिर्वृते ॥१९४॥
इदं प्रजप्तं पठितं पाठितं श्रावितं श्रुतं॥
व्याहृतं चर्चितं ध्यातं विमृष्ट मभिनंदितं ॥१९५॥
इहामुत्र अविध्नेषं सर्वैश्वर्य प्रदायकं॥
स्वच्छन्द चारिणाऽ प्येष येन संधार्यते स्तवः ॥१९६॥
स रक्षते शिवोभ्दूते र्गणैरप्यष्ट कोटिभिः ॥१९७॥
लिखितं पुस्तके स्तोत्रं मंत्रभूतं प्रपूजयेत॥
तत्र सर्वोत्तमा लक्ष्मीः सन्निध त्ते निरंतरं ॥१९८॥
दानैरशेषै रखिलै र्व्रतैश्च तीर्थैरशेषैरखिलैर्मखैश्च॥
न तत्फलं विदंति यद् गणेश। सहस्त्रनाम्नां स्मरणेन सद्यः॥ १९९॥
एतन्नाम्नां सहस्त्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने॥
सायं मध्यंदिने वा त्रिषणमथवा संततं वा जनो यः॥
स स्यादैश्वर्य धुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति॥
दारिद्र्यं हंति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः ॥२००॥
अकिंचनोऽप्येकचित्तो नियतो नियताशनः॥
प्रजपं श्चतुरो मासान् गणेशार्चन तत्परः ॥२०१॥
दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि॥
लभते महतीं लक्ष्मी मित्याज्ञा पारमेश्वरी ॥२०२॥
आयुष्यं वीतरोगं कुलमति विमलं संपदः श्रेणिदानाः॥
कीर्तिः पुण्यावदाता भणतिरभिनवा कांतिरव्याधिभव्या॥
पुत्राः संतः कलत्रं गुणवदभिमतं यद्यदन्यच्च तत्त॥
नित्यं यः स्तोत्र मेतत् पठति गणपते स्तस्य हस्ते समस्तं॥ २०३॥

गणंजयो गणपति र्हेरम्यो धरणीधर: ॥
महागणपति र्बुद्धि प्रिय: क्षिप्रप्रसादन: ॥ २०४ ॥
अमोघसिद्धि रमित मंत्रश्चिंताममणिर्निधि: ॥
सुमंगलो बीजमाशा पूरको वरद: कवि: ॥ २०५ ॥
काश्यपो नंदनो वाचासिद्धो ढुंढि र्विनायक: ॥
मोदकै रेभिरत्रैक विंशत्या नामभि: पुमान् ॥ २०६ ॥
य:स्तौति मद्गतमना मदाराधन तत्पर: ॥
स्तुतो नाम्नां सहस्त्रेण तेनाहं नात्र संशय: ॥ २०७ ॥
नमो नम: सुरवरपूजितांघ्रये ॥
नमो नमो निरुपम मंगलात्मने।
नमो नमो विपुल साधक सिद्धये ॥
नमोनम: करिकल भाननाय ते ॥ २०८ ॥
किंकिणी गण रचित चरण: ॥
प्रकटित गुरुमित चारु करण: ॥
मदजललहरी कलित कपोल: ॥
शमयतु दुरितं गणपति र्नृप नाम्ना ॥ २०९ ॥

॥ इति श्री मदादि श्री मन्महा गाणेश्वरे महापुराणे
उपासना खण्डे ईश्वरमहागणपति संवादे-
श्री मद्गणेश दिव्य सहस्त्रनामामृत स्तोत्रम् ॥
= संपूर्णम् =

॥ इति श्रीमद् गणेश सहस्त्रनाममाला मंत्रात्मक- ॥
॥ स्तोत्रं समाप्तम् ॥

卐